CAREERINDIA

# आदर्शप्रश्नपत्रम् – 2019-20

## संस्कृतम् (केन्द्रिकम्)

## Sanskrit Core (322)

## कक्षा – XII

**समयः – होरात्रयम्** | **अङ्कयोजना** | **पूर्णाङ्काः - 80**

**अवधातव्यम् -**

1. अस्याम् अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति । प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति ।
2. अनुच्छेदे श्लोके वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति । अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाची-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति । तदर्थम् अङ्काः देयाः । यदि विद्यार्थिनः उत्तरदान-समये समुचितानां विभक्तीनां वचनानां प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः ।
3. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः ।
4. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः ।
5. 'ख' खण्डे (रचनात्मक-कार्ये) वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम् । अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः ।

6. **यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम्।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्
7. **प्रश्ननिर्माणस्य प्रश्ने ½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय। <u>परं सम्यक्-प्रश्ननिर्माणं भवति तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः</u>।**

### खण्डः – क

### अपठित - अवबोधनम् 10 अङ्काः

1. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत -**

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नचतुष्टयम्)** ½×4=2

(i) राजमार्गे

(ii) सेवकाः

(iii) स्त्रीपुत्रादिभ्यः

(iv) भिक्षुः

(v) तथागतः

www.careerindia.com

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 2×2=4

(i) भगवान् बुद्धः भिक्षुं दिग्भ्यः प्रणामनिवेदनस्य अभिप्रायं पृच्छति।

(ii) सेवकान् प्रति प्रणामः अस्मत्स्नेहं वात्सल्यं सौहार्दं च सूचयति।

(iii) पूर्वदिशि कृतः नमस्कारः तु मातापितृभ्यां गृहस्वामिने च भवति। दक्षिणदिक् आचार्याय , पश्चिमदिक् स्त्रीपुत्रादिभ्यः, उत्तरदिक् च मित्रादीनां कृते भवति। एवमेव ऊर्ध्वदिक् श्रमणब्राह्मणेभ्यः अधोदिक् च सेवकेभ्यः भवति।

**(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 1×1=1

**(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** 1×3=3

(i) सेवकेभ्यः

(ii) अब्रवीत्

(iii) भगवान्

(iv) गच्छन्

**खण्डः – ख**

**रचनात्मक–कार्यम्** 15 अङ्काः

2. भवान् / भवती रमेशः / रमा । शैक्षिक - भ्रमण - दले समावेशाय प्रधानाचार्यां प्रति लिखिते आवेदन पत्रे रिक्तस्थानानि मञ्जूषातः चित्वा, पूरयित्वा च पुनः पत्रं लिखत - ½×10=5

सेवायाम्

(i) **<u>प्रधानाचार्याः</u>**

राजकीयसर्वोदयसहशिक्षाविद्यालयः, सुल्तानपुरी

विषयः - (ii) **<u>शैक्षिकभ्रमणदले समावेशाय निवेदनम्</u>** ।

मान्याः !

सादरं (iii) **<u>निवेदनीयम्</u>** अस्ति यद् अहम् एतस्मिन् (iv) **<u>विद्यालये</u>** नवमकक्षायाम् 'अ' वर्गे पठामि। एवं मया श्रूयते यद् आगामिनि शीतकाले अस्माकं विद्यालयात् किमपि (v) **<u>शैक्षिकभ्रमणदलं</u>** नैनीतालं गमिष्यति। नूतन-स्थलानां दर्शने, नूतन-तथ्यानां ज्ञानार्जने च मम (vi) महती अभिरुचिः। अतः अहम् अपि (vii) **<u>अनेन</u>** दलेन सह गन्तुम् इच्छामि । एतदर्थं मया माता-पितृभ्याम् (viii) **<u>अनुमतिः</u>** अपि प्राप्ता । साग्रहं (ix) **<u>प्रार्थयामि</u>** यद् एतदर्थम् अनुमतिं प्रदाय (x) **<u>कृतार्थीकरणीयः</u>** अयं जनः ।

सधन्यवादम्,

भवतां विनीतः शिष्यः/विनीता शिष्या,

रमेशः/ रमा

www.careerindia.com

3. **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -** ½×10=5

एकदा स्वामिविवेकानन्दः (i) **<u>वाराणस्याम्</u>** सङ्कटमोचन-मन्दिरात् दर्शनं कृत्वा आगच्छन् आसीत्। तस्य हस्ते भगवते (ii) **<u>अर्पितं</u>** नैवेद्यम् आसीत्। मन्दिरपरिसरे एव केचन वानराः तं परितः आगत्य प्रसादम् अपहर्तुं (iii) **<u>प्रयतन्ते</u>** स्म। विवेकानन्दः (iv) **<u>भयाक्रान्तः</u>** सन् धावनम् आरब्धवान् वानराः अपि विवेकानन्दम् अनुधावितवन्तः तत्रैव एकः (v) **<u>संन्यासी</u>** एतद् सर्वं पश्यन्नासीत्। सः विवेकानन्दम् उच्चैः उक्तवान् तिष्ठ, भयं मा कुरु, तत्रैव (vi) **<u>स्थित्वा</u>** आगतं सङ्कटं (vii) **<u>प्रत्यक्षीकुरु</u>**। विवेकानन्दः तथैव कृतवान्। विवेकानन्दे (viii) **<u>स्थिते</u>** सति वानराः पलायितवन्तः। अस्माकं (ix) **<u>जीवने</u>** अपि पलायनप्रवृत्तिः (x) **<u>नागच्छेत्</u>** इति चिन्तनीयम्।

4. **"अनुशासनम्" इति विषयमधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं लिखत।** 1×5=5
**(मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् गृहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लेखितव्यम्।)**

**मञ्जूषा**

| |
|---|
| जीवने, आवश्यकम्, सर्वत्र, पालनम्, आज्ञायाः, आदेशानाम्, पतनस्य, अनुशासनहीनः, संविधाने, विद्यालयस्य, देशस्य, विद्यार्थिनाम्, कर्त्तव्यम्। |

**अथवा**

**निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत -** 1×5=5

1. हिमालयादारभ्य समुद्रपर्यन्तं भारतस्य सीमाक्षेत्रम् अस्ति।
2. छात्राणां प्रतिवर्षं षाण्मासिकी वार्षिकी च परीक्षा भवति।
3. श्वः विद्यालये अवकाशः भविष्यति।
4. आकाशः तारकैः युक्तः अस्ति।
5. राजा राज्यस्य रक्षां करोति।
6. किं त्वं श्वः तत्र न गमिष्यसि? / किं यूयं श्वः तत्र न गमिष्यथ?
7. गरुडः आकाशे उड्डयते।

**खण्डः - ग**

**अनुप्रयुक्तव्याकरणम्** 20 **अङ्काः**

5. **अधोलिखितवाक्येषु रेखांकितपदानां सन्धिं सन्धिच्छेदं वा कुरुत - (केवलं श्लषट्कम्)** 1×6=6

(i) <u>स्नापयन्+इव</u>
(ii) <u>मया+एकाकिना</u>
(iii) <u>क्षीरनिधौ+इव</u>।
(iv) <u>पितरस्तासाम्</u>

(v) पुनः+आयास्यामि।

(vi) लभन्तेऽतितरां

(vii) समं+चयन्तः।

(viii) पुनः+धनम्।

6. **निम्नलिखितवाक्येषु रेखाङ्कित-समस्तपदानां विग्रहं कुरुत - (केवलं प्रश्नपञ्चकम्)** 1×5=5

(i) कृतः निश्चयः येन सः।

(ii) कामक्रोधलोभान्

(iii) सर्वविद्यानिष्णाता

(iv) गजेन्द्रारूढः

(v) त्रिवर्गम्

(vi) जनानाम् अभावः

(vii) महान् चासौ यत्नः / महान् यत्नः

(viii) पत्युः गृहम्

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययं योजयत पृथक् वा कुरुत – (केवलं प्रश्नषटकम्)** 1x6=6

(i) प्र+विश्+क्त

(ii) मन्+ शानच्

(iii) आनेतव्यम्

(iv) बल + मतुप्

(v) संन्यासी

(vi) स्वतन्त्रा

(vii) स्थल+ङीप्

8. **कोष्ठकप्रदत्तपदैः सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत – (केवलं प्रश्नत्रयम्)** 1x3=3

(i) मया सदृशः अन्यः कः अस्ति?

(ii) नारी एव समस्तसृष्टेः निर्मात्री, परं कथनेन किम्?

(iii) अपि च सूर्यं प्रति पूर्वाभिमुखा पृथिवी।

(iv) सः पुनः क्षणात् अनन्तरं तमेव पादध्वनिं श्रुतवान्।

(v) सत्यात् न प्रमदितव्यम्।

www.careerindia.com

CAREERINDIA

## खण्डः – घ भाग - I

## पठित-अवबोधनम् 25 अङ्काः

9. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½×2=1

(i) आथर्वणः

(ii) इह

(iii) द्विविधा

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्) 2×1=2

(i) शास्त्रं द्विधा-अपौरुषेयं पौरुषेयं च।

(ii) ऋग्यजुः सामवेदास्त्रयी वेदत्रयी भवन्ति।

III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम्) ½×4=2

(i) तुरीयः

(ii) अपौरुषेयम्

(iii) विवृत्तक्रियाः

(iv) अन्यः

(v) वेदेभ्यः

10. अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½×2=1

(i) जननी

(ii) ततिः

(iii) माम्

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्) 2×1=2

(i) प्रिय-पारतन्त्र्याःकातराः (जनाः) जननीं स्वतन्त्रां न विहितवन्तः।

(ii) यत्र तरूणां ततिः शाखाकदम्ब-कृत-मर्मरम् आतनोति।

III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम्) ½×4=2

(i) ततिः

(ii) जनन्यै

(iii) तरूणाम्

(iv) स्वतन्त्रा

(v) स्वतन्त्रा

11. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -

I. एकपदेन उत्तरत - (केवलं प्रश्न द्वयम्) ½×2=1

www.careerindia.com

CAREERINDIA

(i) कठोरभाषणैः

(ii) अपराधः

(iii) महाराजस्य

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्) 2×1=2

(i) संन्यासिनो ब्रह्मचारिणः पण्डिताः, स्त्रियो बालाश्च न किमपि प्रष्टव्याः।

(ii) वयं केवलं महाराजशिववीरस्याज्ञां शिरसा वहामः।

III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम्) ½×4=2

(i) दौवारिकेभ्यः

(ii) अयम्

(iii) रात्रौ

(iv) ब्राह्मणः

(v) वयम्

12. अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत - ½×6=3

भावार्थः –

कर्तव्याकर्तव्यं वर्णयन् भगवान् श्रीकृष्णः (i) <u>अर्जुनस्य</u> माध्यमेन अस्मान् सर्वान् (ii) <u>बोधयति</u> यत् कामः क्रोधः (iii) <u>लोभश्च</u> एतानि त्रीणि नरकस्य द्वाररूपाणि अतः यः जनः (iv) <u>आत्मनः</u> नाशं नेच्छति अपितु स्वकीयं कल्याणमिच्छति सः एतानि द्वाराणि (v) <u>नोद्घाटयेत्</u>। सर्वप्रयत्नैः च एतेषां त्रयाणां त्यागं कुर्यात् येनैतानि त्रीणि द्वाराणि सदैव तस्य कृते (vi) <u>पिहितानि</u> तिष्ठेयुः। सः च उन्नति-पथि अग्रसरो भवेत्।

**अथवा**

प्रदत्ते भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत- 1×3=3

(क) सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।

(i) रविः कतिगुणमुत्स्रष्टुं जलं गृह्णाति।

(ख) अनन्यशासनामुर्वीं शशासैकपुरीमिव।

(iii) सर्वशासकेन शासितं गगनं शासनं चकार।

(ग) सर्वस्य लोचनं शास्त्रम् ।

(i) शास्त्राणां ज्ञानं सर्वेषां लोचनं भवति ।

13. अधोलिखित- श्लोकयोः प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरूत - ½×6=3

(क) अन्वयः –

एकेन अपि (i) <u>विद्यायुक्तेन</u> साधुना सुपुत्रेण सर्वं कुलम्(ii) <u>आह्लादितं</u> यथा (iii) चन्द्रेण शर्वरी।

(ख) अन्वयः –

www.careerindia.com

शैशवे (iv) <u>अभ्यस्तविद्यानां</u> (रघुवंशिनां) यौवने (v) <u>**विषयैषिणाम्**</u> वार्द्धके (vi) <u>**मुनिवृत्तीनाम्**</u> अन्ते योगेन तनुत्यजाम्।

अथवा

**प्रश्नपत्रात् भिन्नं पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य भावार्थं लिखत-** 3×1=3

14. **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -** ½×4=2

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (i) शाटीव सा जयति | (घ) काचन हल्दीघाटी |
| (ii) मातेव रोदिति सखे! | (क) कुररी नु काचित् |
| (iii) "श्रीराम" नाम मधुरं | (ख) मधुरं क्वणन्तः |
| (iv) शोभां दधात्युषसि | (ग) काञ्चनकाञ्चनीयाम् |

15. **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसंगनुसारं शुद्धम् उत्तरं चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्)** ½×4=2

(i) (ग) आलिङ्गते

(ii) (क) अखादन्

(iii) (ख) व्याख्या

(iv) (क) प्रकारः

(v) (ख) व्याख्यानम्

**खण्डः – घ भाग - ii 10 अङ्काः**

**सामान्यसंस्कृतसाहित्यपरिचयः**

16. **अधोलिखितेषु कस्यापि एकस्य कवेः परिचयः संस्कृतेन लिखत - ( केवलं प्रश्नैकम् )** 3×1=3

**(i) अश्वघोषः**

अश्वघोषः बौद्धसाहित्यस्य प्रथमः संस्कृतकविः आसीत् । चीनानुश्रुत्याः साहित्यिक-परम्परायाः चानुसारम् अयं कनिष्कस्य राजगुरुः राजकविः च आसीत् आचार्यः भदन्तः महावादी आद्युपादिभ्यः अश्वघोषः विभूषितः आसीत् बुद्धचरितम् सौदरानन्दकाव्यम्,गाण्डीस्तोत्रगाथा शारिपुत्रप्रकरणम् इत्यादयः एतस्य प्रमुखाः रचनाः सन्ति। बौद्धधर्मे श्रद्धा अन्यधर्मेषु च सहिष्णुता अश्वघोषस्य वैशिष्ट्यम् आसीत्।

**(ii) आचार्यः चाणक्यः**

कौटिल्यविष्णुगुप्तयोः नाम्ना ख्यातः अयं विश्वश्रुतः कविः आसीत्। ४०० ई.पू. एतस्य

www.careerindia.com

काल: मन्यते । अर्थशास्त्रम् इति प्रसिद्धः राजनैतिक-विषयस्य अद्वितीयः ग्रन्थः वर्तते सूत्रात्मकेऽस्मिन् ग्रन्थे पञ्चदशाधिककरणानि वर्तन्ते । चाणक्यनीतिः चाणक्यस्य इतोऽपि एका ख्यातरचना वर्तते। एतस्मिन् ग्रन्थे जीवनपद्धतिः नीतिदर्शनम् । राजनीतिः युद्धम् इत्यादयः विषयाः सन्ति।

**(iii) बिल्हणः**

बिल्हणः एकादश्याः शताब्देः कश्मीरप्रदेशस्य सुविख्यातः संस्कृतकविः आसीत् । चौरपञ्चाशिका विक्रमाङ्कदेवचरितञ्च एतस्य द्वे प्रसिद्धे रचने वर्तेते। महाकविना बिल्हणेन कश्मीरं "शारदादेशः" इति कथितः यतोऽहि अत्र संस्कृतसाहित्यस्य नैके रचनाकाराः रचनाश्च जाताः। अयं चालुक्यसम्राजः विक्रमादित्यस्य राजकविः आसीत्।

**अथवा**

**मञ्जूषाप्रदत्तपदानां साहाय्येन अधोलिखितवाक्येषु रिक्तस्थानपूर्तिं कुरुत -** ½×6=3

(i) कालिदासः द्वे गीतिकाव्ये अलिखत्।

(ii) नाटके पञ्च सन्धयः भवन्ति।

(iii) स्वप्नवासवदत्तम् भासेन रचितमस्ति।

(iv) मुद्राराक्षसे विदूषकः नास्ति।

(v) पद्यं छन्दोयुक्तं भवति।

(vi) आख्यायिकायाः ऐतिहासिकं वृत्तं भवति।

17. **गद्य-पद्य-नाटकस्य च विधानां मुख्यविशेषताः लिखत-** 3×1=3

18. **चम्पूकाव्यस्य खण्डकाव्यस्य वा चत्वारि वैशिष्ट्यानि लिखत-** 4×1=4

(i) चम्पूकाव्यं प्रबन्धात्मकी रचना वर्तते।

(ii) एतत् स्तबकेषु उच्छवासेषु उल्लासेषु च विभक्तं वर्तते ।

(iii) एतस्य नायकः देवता गन्धर्वः मनुष्यः पक्षी वा भवितुम् अर्हति । अत्र नायिका आवश्यकी न भवति ।

(iv) शृङ्गारवीरशान्तरसेषु कश्चन एकः प्रधानः रसः भवति ।

(v) एतत् नाटकवत् अभिनेयं न भवति अत्र तु संवादशैली भवति ।

---